# योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०८८



अष्टाशीतितमः सर्गः ८८

श्रीब्रह्मोवाच ।

ब्रह्माणो ब्राह्मणा भानुरित्युक्त्वा ब्रह्मणो मम ।

ब्रह्मन्ब्रह्मविदां श्रेष्ठ तूष्णीमेव बभूव सः ।। १

तत उक्तं मया तस्य चिरं संचिन्त्य चेतसा ।

भानो भानो वदाशु त्वं किमन्यत्संसृजाम्यहम् ।। २

एतानि दश विद्यन्ते किल यत्र जगन्ति वै ।

तत्रान्यो मम सर्गेण कोऽर्थः कथय भास्कर ।। ३

इत्युक्तोऽथ मया भानुः संचिन्त्य सुचिरं धिया ।

इदमत्र वचो युक्तमुवाच स महामुने ।। ४

भानुरुवाच ।

निरीहस्य निरिच्छस्य कोऽर्थः सर्गेण ते प्रभो ।

विनोदमात्रमेवेदं सृष्टिस्तव जगत्पते ।। ५

निष्कामादेव भवतः सर्गः संपद्यते प्रभो ।

अर्कादिव जलादित्यप्रतिबिम्बमिवाधियः ।। ६

शरीरसंनिवेशस्य त्यागे रागे च ते यदा ।

निष्कामो भगवन्भावो नाभिवाञ्छति नोज्झति ।। ७

सृजसीदं तथा देव विनोदायैव भूतप ।

पुनः संहृत्य संहृत्य दिनं दिनपतिर्यथा ।। ८

तव नित्यमसंसक्तं विनोदायैव केवलम् ।

इदं कर्तव्यमेवेति जगन्न तूद्यमेच्छया ।। ९

सृष्टिं चेन्न करोषि त्वं महेश परमात्मनः ।

नित्यकर्मपरित्यागात्किमपूर्वमवाप्स्यसि ।। १०

यथाप्राप्तं हि कर्तव्यमसक्तेन सदा सता ।

मुकुरेणाकलङ्केन प्रतिबिम्बक्रिया यथा ।। ११

यथैव कर्मकरणे कामना नास्ति धीमताम् ।

तथैव कर्मत्यागे कामना नास्ति धीमताम् ।। १२

अतः सुषुप्तोपमया धिया निष्कामया तया ।

सुषुप्तबुद्धसमया कुरु कार्यं यथागतम् ।। १३

सर्गैरथेन्दुपुत्राणां तोषमेषि जगत्प्रभो ।

तदेते तोषयिष्यन्ति तं त्वां सर्गात्सुरेश्वर ।। १४

चित्तनेत्रैर्भवानेतान्सर्गानन्यस्य नो दृशा ।

अवश्यं चक्षुषा सर्गं सृष्टमित्येव वेत्ति कः ।। १५

येनैव मनसा सर्गो निर्मितः परमेश्वर ।

स एव मांसनेत्रेण तं पश्यति हि नेतरः ।। १६

न चैतान्दश संसारान्दश नीरजसंभवान् ।

कश्चिन्नाशयितुं शक्तश्चित्तदार्ढ्याच्चिरस्थितान् ।। १७

कर्मेन्द्रियैर्यत्क्रियते तद्रोद्धुं किल युज्यते ।

न मनोनिश्चयकृतं कश्चिद्रोधयितुं क्षमः ।। १८

यो बद्धपदतां यातो जन्तोर्मनसि निश्चयः ।

स तेनैव विना ब्रह्मन्नान्येन विनिवार्यते ।। १९

बहुकालं यदभ्यस्तं मनसा दृढनिश्चयम् ।

शापेनापि न तस्यास्ति क्षयो नष्टेऽपि देहके ।। २०

यद्बद्धपीठमभितो मनसि प्ररूढं

तद्रूपमेव पुरुषो भवतीह नान्यत् ।

तद्बोधनादितरमत्र किलाभ्युपायं

शैलौघसेकमिव निष्फलमेव मन्ये ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० उत्पत्तिप्रकरणे ऐ० ऐन्दवनिश्चयकथनं नामाष्टाशीतितमः सर्गः ।। ८८ ।।